Foundation Lecture Book Series - 2
संस्थापनाविशेषोपन्यासग्रन्थमाला-२

नाट्यशास्त्रगौरवम्

आचार्यः राधावल्लभ त्रिपाठी

प्रकाशकम्

कर्नाटकसंस्कृतविश्वविद्यालयः

पम्पमहाकविमार्गः, चामराजपेटे, बेङ्गलूरु - ५६००१८

Foundation Lecture Book Series - 2

संस्थापनाविशेषोपन्यासग्रन्थमाला-२

नाट्यशास्त्रगौरवम्

आचार्यः राधावल्लभ त्रिपाठी

प्रसाराङ्गम्

कर्नाटकसंस्कृतविश्वविद्यालयः

पम्पमहाकविमार्गः, चामराजपेटे, बेङ्गलूरु - ५६००१८

NATYASHASTRA GAURAVAM
(THE GLORY OF NATYA SHASTRA)

by **Prof. Radhavallabha Tripathi, Vice-Chancellor,**
Rashtriya Samskrit Samsthan(Deemed University),
New Delhi-110058. Tel: 011-28520977
E-Mail : radhavallabh2002@gmail.com

Chief Editor
Prof. Mallepuram G. Venkatesha
E-Mail : mallepuram@yahoo.com

Published by
Registrar
Karnataka Samskrit University
Pampa Mahakavi Road, Chamarajpet
Bangalore - 560018.
Ph: 080 - 26701303, 26705387
E-Mail: karnatakasanskrituniversity@gmail.com

First Impression: 2012
Copies: 500
Page: ii + 26 = 28
Price: **Rs. 10**

Paper used: **70GSM NS book print**

Printed at:

नाट्यशास्त्रगौरवम्

नाट्यशास्त्रगौरवमिति शीर्षकान्विते व्याख्याने नाट्यशास्त्राख्यग्रन्थस्य अधिकारिविषयप्रयोजनसम्बन्धनिरूपणपुरस्सरं यथामति परिचयं विधातुमहं यतिष्ये। अस्ति नाट्यशास्त्रस्य भारतीयकलापरम्परायामसाधारणं गौरवम्, तस्य महावाक्यत्वात्, आकरग्रन्थत्वात्, सर्वाङ्गीणत्वात्, प्रमाणाधिष्ठितत्वाच्च इति अत्र प्रतिज्ञावाक्यम्।

अस्य तावन्नाट्यशास्त्राख्यग्रन्थस्य कर्ता भरतमुनिः, अधिकारी चात्र विमलप्रतिभानशाली सहृदयः प्रेक्षकः, नाट्यं नाट्यवेदो वा अस्य विषयः।

सम्बन्धश्चात्र प्रायश्चतुर्विधः विषय-ग्रन्थयोः प्रतिपाद्यप्रतिपादकभावः इत्येकः सम्बन्धः, ग्रन्थविषयस्य नाट्यवेदस्य कर्तृ-प्रयोक्तृ-भोक्तृभिश्च सम्बन्धश्च। कर्ता चात्र नाट्यकारः कविर्वा। प्रयोक्ता सूत्रधारो नटो वा। भोक्ता च विमलप्रतिभानशाली सहृदयः प्रेक्षकः। तत्रापि नाटककार-नाट्यप्रयोक्तृ-प्रेक्षकाणां परस्परसम्बन्धाद् भवन्ति सम्बन्धस्य अवान्तरा भेदाः। एते सर्वे सम्बन्धाः विशदं निरूपिताः नाट्यशास्त्रग्रन्थे।

प्रयोजनं चास्य नाट्यशास्त्रग्रन्थस्य पुरुषार्थसिद्धिः।

नाट्यशास्त्रं नाम काव्य-नाट्य-कलानामाकरग्रन्थः। भरतमुनिना व्यासेनेव नाट्यशास्त्रसंहितेयं निर्मिता। यथा महाभारतं संहिता, तथा

नाट्यशास्त्रम्। महाभारतं भारतीयसंस्कृतेर्विाकोशः, नाट्यशास्त्रं नाट्यपरम्पराणां विाकोशः। यन्न भारते तन्न भारते - इति महाभारतमधिकृत्य आभाणकः पण्डितपरम्परायां प्रथितः। स्वयमपि भगवता व्यासेनोक्तम् -

धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्।

भरतमुनिविरचितस्य नाट्यशास्त्रग्रन्थमधिकृत्यापि एतदेव वक्तुं शक्यते - यद् भारतीयकलापरम्परायामस्ति तत्सर्वं अस्मिन् भारतीये (भरतमुनिप्रोक्ते) नाट्यशास्त्रे वर्तते, यदस्मिन् भारतीये नाट्यशास्त्रे नास्ति, तत् भारतीयकलापरम्परायामपि न वरीवर्तीति। अत एव महाभारतविषयक आभाणकः किञ्चित् परिवर्त्य नाट्यशास्त्र -विषये इत्थं विनियोजयितुं शक्यते -

नाट्ये गीते च काव्ये च यद्वा शिल्पकलासु च।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्।

नाट्यादिकलाविषयक एतावान् पुरातनः एतावांश्च सर्वाङ्गीणो ग्रन्थो विश्ववाङ्मये अन्यो नास्ति।

शास्त्रलक्षणं द्विविधमुक्तम् - शंसनाच्छास्त्रम्, शासनाच्च शास्त्रमिति। नाट्य-शास्त्रं कवि-नट-नाट्याचार्यप्रभृतीनां कृते शंसनं शासनं चेत्युयमपि साधयति। नाट्यशास्त्रं प्रवक्ष्यामि ब्रह्मणा यदुदाहृतमिति नाट्यशास्त्रस्य प्रथमकारिकाया व्याख्याने नाट्यस्य नटवृत्तस्य शास्त्रं शासनोपायं ग्रन्थम् - इति अभिनवगुप्ताचार्योक्तेः, अथ च भरतसिद्धसदुपायोपदेशपरकशास्त्रम् इत्यपि तस्यैव प्रतिपादनाच्च।[१]

---

१. अभिनवभारती, अ. १, पृ. ३

नाट्यशास्त्रम् – महावाक्यम्

नाट्यशास्त्रम् इदं परःसहस्राभ्यः समाभ्यः प्रचलितानां नाट्यपरम्पराणां शंसनं करोति, विविधानां मतानां रीतीनां पद्धतीनां चापि विवृतिं विधत्ते। विकल्पा नाट्यप्रयोगविषये सर्वदा सावकाशाः। अस्य कर्ता भरतमुनिः क्वचित् ग्रन्थे एव कथापात्रत्वेनापि वर्णितः, क्वचित्तस्य वचनानि प्रथमपुरुषे क्वचिद् अन्यपुरुषत्वेनोद्धृतानि। तर्हि अत्र एकवाक्यता कथम्? सदाशिव-ब्रह्मा-भरतानां प्रस्थानत्रयमत्र विवृतं, तस्मिंश्च ब्रह्मप्रस्थानस्य साररूपता मुनिना प्रत्यपादीति महावाक्यत्वं नाट्यशास्त्रग्रन्थस्य घटते।[२] सत्स्वपि नानावक्तृषु, मतमतान्तरप्रतिपादनेषु च शास्त्रे पूर्वपक्षोत्तरपक्षप्रतिपादनेन यथा एकवाक्यता निर्वाह्यते तथैवात्रापि। अथ च भरतमुनिना नाट्यशास्त्रग्रन्थसमाप्तौ उक्तम् -

य इमं शृणुयात्प्रोक्तं नाट्यवेदं स्वयम्भुवा।
कुर्यात्प्रयोगं यश्चैनं तथाऽधीयीत वा नरः॥
या गतिर्वेदविदुषां या गतिर्यज्ञवेदिनाम्।
या गतिर्दानशीलानां तां गति प्राप्नुयात्तु सः ॥इति॥

(ना.शा.अ.३६)

वस्तुत एकवाक्यता ग्रन्थेऽस्मिन् प्रश्नपञ्चकनिरूपणात् साधिता।[३] एतच्च सविस्तरमग्रे निरूपयिष्यामः।

---

२ **अथ मुनिरात्मानमेव परत्वेन कल्पयन् ब्रह्मणा यदुदाहृतमित्येत देव पुराकल्पप्रदर्शनेन निश्चाययति...**
... एवं प्रश्नञ्चकात् कविप्रयोक्त्रोरुपदेशपरं शास्त्रमिति लक्ष्यते। (अभिनवभारती, अ. १)

३ **वयं तु ब्रूमः नात्र क्रमः कश्चित्। अपि तु यथावसरं महावाक्यात्मना षट्सहस्रीरूपेण प्रधानतया प्रश्नपञ्चकनिरूपणरेण शास्त्रेण तत्त्वं निर्णीयते। (अभिनवभारती, अ. १)**

नाट्यशास्त्रम् – नाट्यकलापरम्पराणाम् आकरग्रन्थः

विदाङ्कुर्वन्तु विपश्चितः - इह तावदस्मत्परम्परायां शास्त्रग्रन्थाः द्विविधा उपलभ्यन्ते - आकरग्रन्थाः भाष्यग्रन्थाश्च। आकरग्रन्थैः परम्पराः निर्मीयन्ते, स्थाप्यन्ते, उपजीव्यन्ते च। भाष्यग्रन्थैः परम्पराः परिरक्ष्यन्ते।

नाट्यशास्त्रं नाम आकरग्रन्थः प्रमाणाधिष्ठितत्वात्, इतरशास्त्रानुबन्धित्वात्, नाट्यविषयकसर्वविधपरम्परोपजीवकत्वात्। तस्मात् भारतीयकविनटपरम्परायां भारतीयकलाशास्त्रपरम्परायां वा नाट्यशास्त्रं पञ्चमीवेदसंहिता नाट्यमपि पञ्चमो वेद इति प्रतिष्ठा च निष्ठा च। नाट्यं नाम वेद इति काचन परम्परा नाट्यशास्त्रे प्रोक्ता, तस्य पौराणिकं वृत्तमपि इत्थं मुनिना प्रत्यपादि - पुरा कृतयुगेऽवसिते त्रेतायुगे च सम्प्राप्ते जनाः विविधैर्दुःखैः प्रपीडिताः, तद् दृष्ट्वा लोकानां हितकाम्यया महेन्द्रप्रमुखा देवा पितामहं प्राप्य तं प्रार्थयामासुः

क्रीडनीयकमिच्छामो दृश्यं श्रव्यं च यद्भवेत्।।
न वेदव्यवहारोऽयं संश्राव्यः शूद्रजातिषु।
तस्मात्सृजापरं वेदं पञ्चमं सार्ववर्णिकम्।।

(नाट्यशास्त्रम्, १.११, ख-१२)

ततश्च ब्रह्मणा चतुर्भ्यो वेदेभ्यो एकैकं तत्त्व निष्कृष्य पञ्चमस्य सार्ववर्णिकस्य नाट्यवेदस्य सृष्टिर्विहिता।[४]

---

४ **धर्म्यमर्थ्यं यशस्यं च सोपदेशं ससंग्रहम्।**
भविष्यतश्च लोकस्य सर्वकर्मानुदर्शकम्।।
सर्वशास्त्रार्थसंपन्नं सर्वशिल्पप्रवर्तकम्।
नाट्याख्यं पञ्चमं वेदं सेतिहासं करोम्यहम्।।
संकल्प्य भगवानेवं सर्वान् वेदाननुस्मरन्।
नाट्यवेदं ततश्चक्रे चतुर्वेदाङ्गसम्भवम्।।
जग्राह पाठ्यमृग्वेदात् सामभ्यो गीतमेव च ।
यजुर्वेदादभिनयान् रसानाथर्वणादपि ।।
वेदोपवेदैः संबद्धो नाट्यवेदो महात्मना।
एवं भगवता सृष्टो ब्रह्मणा सर्ववेदिना ।। (नाट्यशास्त्रम्, १.१४ख-१८)

नाट्यं नाम सार्ववर्णिकः पञ्चमो वेदः इति देवानां मुखेभ्योनुरोधमभिव्यज्य आख्यानच्छलेन नाट्यवेदस्य सार्वजनीनत्वं सार्वभौमिकत्वं च प्रत्यपीपदन्मुनिर्भरतः। अत्र नाट्यं सर्वशास्त्रार्थसम्पन्नं सर्वशिल्पप्रवर्तकमिति प्रोक्तम्। नाट्यशास्त्रमपि एतस्य सर्वशास्त्रार्थसम्पन्नस्य नाट्यतत्त्वस्य प्रतिपादनात् सर्वशास्त्रार्थसंपन्नं सर्वशिल्पप्रवर्तकं शास्त्रम्। अत्र शिल्पपदेन craft इति सङ्कीर्णोऽर्थो नैव ग्राह्यः। ऐतरेयमहीदास ऐतरेयब्राह्मणे समस्तं विामेव देवस्य परमोरस्य वा शिल्पम्, तदस्य विाात्मकस्य शिल्पस्य अनुकृतिर्यदा मनुष्येण क्रियते तदा तन्मानुषं शिल्पं भवतीति विशदं प्रत्यपीपदत्।[५] तत्र छन्दांसि मन्त्राः काव्यमपि वा शिल्पमित्येव उक्तानि।[६] शिल्पस्य एवंविधम् एव व्यापकं स्वरूपं भरतमुनेरत्राप्यभिमतम्, नाट्यशास्त्रे पूर्वापरप्रसङ्गेन तदेव युज्यते। कौषीतकिब्राह्मणे तु नृत्य-गीत-वादित्राणि शिल्पानीति लक्षणम्।[७]

यथा पुराणपरम्परायाम् आख्यानं नाम पञ्चमो वेद इति श्रुतिरेव स्वयमुपदिशति महाभारतं च एतस्य आख्याननाम्नो वेदस्य सङ्ग्रहात् पञ्चमो वेद इत्यपि समाम्नायते, तथैव नाट्यं पञ्चमो वेद इति नाट्यपरम्परायाम्, एतस्य नाट्यवेदस्य साकल्येन प्रतिपादनात् नाट्यशास्त्रमप्येतस्यां परम्परायां

---

५ **एतेषां देवशिल्पानामनुकृतीह शिल्पमधिगम्यते। हस्ती, कंसो वासो हिरण्यम्, अश्वतरी रथः। (ऐतरेयब्रा० ३०।१, भाग-३, पृ० १३१)।**

६ **आत्मसंस्कृतिर्वाव शिल्पानि। छन्दोमयं वा। एतैर्यजमान आत्मानं संस्कुरुते। (ऐतरेयब्रा० ३०।१, भाग-३, पृ० १३२)।**
स्तोत्रियं शंसति। आत्मा वै स्तोत्रियः। तं मध्यमया वाचा शंसति। आत्मानमेव तत् संस्कुरुते। ऐतरेयब्रा० १३।१२, पृ० ५१२)

७ **त्रिवृद् वै शिल्पम् नृत्यं गीतं वादितमिति। (कौ०ब्रा० २९।५)**

वेदादिशास्त्रवदेव, भरतश्च नाट्यप्रयोक्ता अस्य नाट्यवेदस्य ऋषिः, अस्य नाट्यवेदस्य ग्रहणे धारणे च देवा न शक्ताः परन्तु ऋषय एवेति स्वयं देवा आहुरिति नाट्यशास्त्रोक्तेः।[८]

नाट्यशास्त्रस्य सर्वाङ्गीणता

यथा महाभारतं प्रथमं व्यासेन प्रोक्तं, अनन्तरं वैशम्पायनेन ततश्च सूतेन शौनकादीनां पुरो महाभारतस्य व्याख्यानं विहितं, तथैव जिज्ञासुभिः ऋषिभिः नाट्यकोविदो भरतमुनिः नाट्यतत्त्वस्य समग्रव्याख्यानाय अनुरुद्धः आत्रेयादीनां ऋषीणां पुरस्तस्य नाट्यवेदविवृतिमाचष्ट। तेन ब्रह्मणोदाहृतं नाट्यशास्त्रं प्रवक्ष्यामीति सङ्कल्पं कृत्वा मुनीनामनुरोधेन नाट्यशास्त्रमाख्यातम्। प्रश्न-प्रतिप्रश्न-समाधान-समन्वित-व्याख्यानेन सर्वाङ्गीणता प्रतिपादनस्य जाता। ऋषिभिः पञ्च प्रश्ना आदौ उपस्थापिताः

---

८ उत्पाद्य नाट्यवेदं तु ब्रह्मोवाच सुरेश्वरम्।
इतिहासो मया सृष्टः स सुरेषु नियुज्यताम्।।
कुशला ये विदग्धाश्च प्रगल्भाश्च जितश्रमाः।
तेष्वयं नाट्यसंज्ञो हि वेदः संक्राभ्यतां त्वया।।
तच्छ्रुत्वा वचनशक्रो ब्रह्मणा यदुदाहृतम्।
प्राञ्जलिः प्रणतो भूत्वा प्रत्युवाच पितामहम् ।।
ग्रहणे धारणे ज्ञाने प्रयोगे चास्य सत्तम्।
अशक्ता भगवन् देवा अयोग्या नाट्यकर्मणि ।।
य इमे वेदगुह्यज्ञा ऋषयः संशितव्रताः।
एते च ग्रहणे शक्ताः प्रयोगे धारणे तथा ।।
(नाशा. १.१९-२३)

- (१) नाट्यवेदः कथमुत्पन्नः? (२) कस्य कृतेऽयमुत्पन्नः? (३) नाट्यवेदः कत्यङ्गः? अस्य प्रमाणं किम्? (५) अस्य प्रयोगः कीदृशो भवति?[१]

अस्य प्रश्नपञ्चकस्य समाधाने भरतमुनिना यद् विवेचनं विहितं, तेन नाट्यशास्त्रं नाम ग्रन्थो विनिर्मितः। तत्र प्रश्नपञ्चके प्रथम-द्वितीय - प्रश्नयोस्तु समाधानमुपरि चर्चितेन नाट्योद्भवाख्यानेन जायत एव, नाट्यं सार्ववर्णिकः पञ्चमो वेदः, स तु सर्वेषां कृते, परन्तु प्रेक्षकेषु संस्कारशीला निर्मलहृदयाश्चावश्यं स्युः। भरतमुनेः प्रेक्षकनिरूपणं काव्यशास्त्रे सहृदयविवेचनस्य पीठिकां निर्मिमीते।

अथ नाट्यशास्त्रस्य कत्यङ्गानीति प्रश्नस्य समाधानभूमिकायां भरतमुनिना प्रथमं नाट्यस्य आनन्त्यं प्रतिपादितम्। विश्वस्मिन्नपि विश्वे नास्ति नाट्यकलाया बाह्यः स्यात्, नाना ज्ञानानि, शिल्पानि, विद्याः, कलाः, योगाः कर्माणि चात्र समन्वितानि। तेन आनन्त्यमेव नाट्यस्य।

---

१ **समाप्तजप्यं व्रतिनं स्वसुतैः परिवारितम्।**
अनध्याये कदाचित्तु भरतं नाट्यकोविदम्॥
मुनयः पर्युपास्यैनमात्रेयप्रमुखाः पुरा।
पप्रच्छुस्ते महात्मानो नियतेन्द्रियबुद्धयः॥
योऽयं भगवता सम्यग्ग्रथितो वेदसम्मितः।
नाट्यवेदः कथं ब्रह्मन्नुत्पन्नः कस्य वा कृते॥
कत्यङ्गः किंप्रमाणश्च प्रयोगश्चास्य कीदृशः।
सर्वमेतद्यथातत्त्वं भगवन् वक्तुमर्हसि ॥
(नाट्यशास्त्रम्, १. २-५)

न शक्यमस्य नाट्यस्य गन्तुमन्तं कथञ्चन ।
कस्माद् बहुत्वाद् भावानां शिल्पानां वाप्यनन्ततः।।
एकस्यापि न वै शक्यमन्तं ज्ञानावर्णवस्य हि।
गन्तुं किं पुनरन्येषां ज्ञानानामर्थतत्त्वतः ।।

नाट्यशास्त्रम्, ६. ६-७

अन्यत्राप्युक्तम् -

न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।
नासौ योगो न तत् कर्म नाट्येस्मिन् यन्न दृश्यते।।

एवंविधस्य अनन्तरूपस्यापि नाट्यस्य नाट्यशास्त्रप्रस्थानानुसारि स्वरूपं वक्तव्यं स्यात्। तेन कत्यङ्गो नाट्यवेद इति मुनीनां प्रश्नस्यापि समाधानं स्यात्। अतश्च एकादशानामङ्गानाम् अयं नाट्यसङ्ग्रहो मुनिना प्रोक्तः - रसाः, भावाः, अभिनयाः, धर्मी, वृत्तयः, प्रवृत्तयः, सिद्धिः, स्वराः, आतोद्यं गानं रङ्गश्च। कासुचिन्मातृकासु पुरातनपुस्तकेषु उपचारस्तथा मण्डपाश्चेति द्वे अङ्गे योजयित्वा त्रयोदशविधो नाट्यसंग्रहः उपदिष्टः।[१०]

---

१० **कित्वल्पसूत्रग्रन्थार्थमनुमानप्रसाधकम् ।**
नाट्यस्यास्य प्रवक्ष्यामि रसभावादिसंग्रहम् ।।८
विस्तरेणोपदिष्टानामर्थानां सूत्रभाष्ययोः ।
निफ्रान्धो यः समासेन संग्रहं तं विदुर्फ्रुधाः ।।९
रसा भावा ह्यभिनया धर्मी वृत्तिप्रवृत्तयः ।
सिद्धिः स्वरास्तथातोद्यं गानं रङ्गश्च संग्रहः।।१०
उपचारस्तथा विप्रा मण्डपाश्चेति सर्वशः ।
त्रयोदशविधो ह्येष ह्युपदिष्टो नाट्यसंग्रहः ।।११
(नाट्यशास्त्रम्, ६. ८- ११।।ट)

सम्पूर्णे नाट्यशास्त्रग्रन्थे नाट्यसङ्ग्रहस्य एकादश त्रयोदश वाऽङ्गानि मुनिना यथाप्रसङ्गं लक्षणोदाहरणपरीक्षाभिः सूत्रभाष्यकारिकाभिश्च विस्तरेण वर्णितानि। तत्र रसादीनामङ्गानां नाट्यशास्त्रग्रन्थे अध्यायानुसारि विवेचनमित्थं लभ्यते -

रसाः	-	षष्ठेऽध्याये
भावाः	-	सप्तमेऽध्याये
अभिनयाः	-	अष्टमात् षड्विंशम् अध्यायं यावत्
धर्मी	-	षष्ठे तथा च त्रयोदशेऽध्याये
वृत्तयः	-	षष्ठे तथा चोनविंशेऽध्याये
प्रवृत्तयः	-	षष्ठे तथा च त्रयोदशेऽध्याये
सिद्धिः	-	सप्तविंशेऽध्याये
स्वराः	-	अष्टाविंशेऽध्याये
आतोद्यम्	-	ऊनत्रिंशत्-त्रिंशदेकत्रिंशदध्यायेषु
गानं	-	द्वात्रिंशेऽध्याये
रङ्गः	-	(नाट्यशाला) - प्रथम-द्वितीय-तृतीयाध्यायेषु
उपचारः	-	द्वाविंशेऽध्याये
मण्डपाः	-	द्वितीयाध्याये

नाट्यस्य पुमर्थोपायता

रसानामुत्पत्तिवर्णदैवतनिदर्शनानि नाट्यशास्त्रग्रन्थे व्याख्यातानि। चत्वारो मूलरसाः कीर्तिताः - शृङ्गारो रौद्रो वीरो बीभत्स इति। चतुर्विधा

अवान्तररसाः हास्यः,अद्भुतः करुणः भयानक इति।[११] तेन चतसृणां वृत्तीनां, चतसृणां प्रवत्तीनां, चतुर्विधानाम् अभिनयानां, चतुर्विधातोद्यानां चतुर्विध-नायकानां स्वाभाविक-प्रसन्न-रक्त-श्यामेति चतुर्विधमुखरागाणाम्, भारत-सात्त्वत-वार्षगण्येति चतुर्णां शस्त्रमोक्षन्यायानां चतुर्णां काव्यालङ्काराणां चतुर्विधपुरुषार्थानां च परस्परं सम्बन्धः श्लिष्यति। स चेत्थम् -

पुरुषार्थाः	कामः	धर्मः	अर्थः	मोक्षः
रसाः	शृङ्गारः	वीरः	रौद्रः	बीभत्सः
अवान्तररसाः	हास्यः	अद्भुतः	करुणः	भयानकः
अभिनयाः	आहार्यः	वाचिकः	आंगिकः	सात्त्विकः
वृत्तयः	कैशिकी	भारती	आरभटी	सात्त्वती
प्रवृत्तयः	दाक्षिणात्या	आवन्ती	मागधी	ािञ्चाली
नायकाः	धीरललितः	धीरोदात्तः	धीरोद्धतः	धीरशान्तः

क्षोभज उद्वेगी चेति अभिनवगुप्तमतेन द्विविधो बीभत्सो रसः। एतयोः क्षोभजः शुद्धः स चित्तविशुद्धिपूर्वकं वैराग्यैकसाधनहेतुभूतां निवृत्तिं साधयति, तेन च बीभत्सरसस्य मोक्षोपायहेतुत्वम्।

अन्यत्र पाठ्यं, गीतिः, अभिनयाः रसाश्चेति चत्वारि अङ्गानि नाट्यवेदस्य प्रोक्तानि तानि च क्रमात् ऋग्वेद-सामवेद-यदुर्वेदाथर्ववेदेभ्य उत्पन्नानीति उक्तम्।

---

११ शृङ्गाराद्धि भवेद्धास्यो रौद्राच्च करुणो रसः।
वीराच्चैवाद्भुतोत्पत्तिर्फ्रीभित्साच्च भयानकः ।।४०।।
शृङ्गारानुकृतिर्या तु स हास्यस्तु प्रकीर्तितः ।
रौद्रस्यैव च यत्कर्म स ज्ञेयः करुणो रसः ।।४१।।
वीरस्यापि च यत्कर्म सोऽद्भुतः परिकीर्तितः ।
फ्रीभित्सदर्शनं यत्र ज्ञेयः स तु भयानकः ।।४२।।
(नाट्यशास्त्रम्, ६.४०-४२)

नाट्यशास्त्रस्य इद तावदनतिसाधारणं महत्त्वं यदिदं शास्त्रं भारतीयां जीवनदृष्टिं ऋषीणां दर्शनं वा कलानुभूतौ कलारचनाप्रक्रियायां समावेशयति, तस्य चरितार्थतायाः कृते समग्रं तन्त्रं प्रस्तौति। योरोपीये कलादर्शने मनुष्यस्य एकाकिता प्रदर्श्यते, भारतीये कलादर्शने मनुष्यस्य देवैः संयोगः समग्रायां सृष्टौ च सामरस्यम् निरूप्यते। तत्कृते तन्त्रं व्यवस्थापितं भरतमुनिना। तत्तु पूर्वरङ्गः, ब्राह्ममण्डलरचना रङ्गदैवतपूजनम् इत्यादिषु विधिषु विशिष्य ज्ञातुं सुशकम्। नाट्योत्पत्तिकथायामेव ब्रह्मणा कथं देवाः स्वांशभागैः सर्वमपि नाट्यमण्डपं रक्षेयुरिति व्यवस्था विहिता। तद्यथा -

रक्षणे चन्द्रमाः विनियुक्तः, दिग्लोकपालाः मारुताश्च विदिक्षु, नेपथ्यभूमौ मित्रावरुणौ, वेदिकारक्षणे वह्निः, आतोद्यादिषु सर्वे दिवौकसो विनियुक्ताः। धारणीषु भूतानि शालास्वप्सरसः, सर्ववेश्मसु यक्षिण्यः, महीपृष्ठे कुट्टिमे वा महोदधिः, द्वारे कृतान्तः कालश्च, द्वारपात्रेषु नागमुख्यौ, देहल्यां यमदण्डः, तस्योपरि स्थितं शूलम् इत्येते नियोजिताः। नियतिर्मृत्युश्च द्वारपालत्वेन विहितौ। तेन नटः रङ्गपीठं प्रविशन् स्वनियतिं मृत्युं च तीर्त्वा अमृतं स्वरूपमाप्नोतीति आशयः।

रङ्गपीठस्य पार्श्वे च महेन्द्रः स्यात्, मत्तवारण्यां विद्युत्, भूतयक्षपिशाचाश्च गुह्यकाश्च तस्याः स्तम्भेषु जर्जरे वज्रम्, तत्पर्वसु सुरेन्द्राः विनियोजिताः। रङ्गपीठस्य मध्ये तु स्वयं ब्रह्मा प्रतिष्ठितः। तथैव नाट्यस्य नायक-नायिका- विदूषकादीनां रक्षणार्थमपि देवाः नियोजिताः।[१२]

---

१२ अंशभागैर्भवद्भिस्तु रक्ष्योऽयं नाट्यमण्डपः॥८३॥
रक्षणे मण्डपस्यास्य विनियुक्तस्तु चन्द्रमाः।
यथादिग्लोकपालाश्च विदिक्ष्वपि च मारुताः॥८४॥
नेपथ्यभूमौ मित्रस्तु निक्षिप्तो वरुणेश्वरः।
वेदिकारक्षणे वह्निर्भाण्डे सर्वदिवौकसः॥८५॥
वर्णाश्चत्वार एवास्य स्तम्भेषु विनियोजिताः।
आदित्याश्चैव रुद्राश्च न्यस्ताः स्तम्भान्तरेषु च ॥८६॥

अन्यत्र साक्षादपि नाट्यस्य पुरुषार्थप्राप्तिहेतुत्वं विशदीकृतं मुनिना। अत्र कर्मभावान्वयापेक्षित्वात्, त्रैलोक्यस्य भावानुकीर्तनात्, धर्मार्थकाममोक्षाणां च प्रतिपादनात्, समग्रस्य मानवजीवनस्य समग्रस्य जगतो वा निरूपणात्

धारणे(णी)ष्वथ भूतानि शालास्वप्सरसस्तथा।
सर्ववेश्मसु यक्षिण्यो महीपृष्ठे महोदधिः।।८७।।
द्वारशाखानियुक्तौ तु कृतान्तः काल एव च।
स्थापितौ द्वारपात्रेषु नागमुख्यौ महाफ्रालौ ।।८८।।
देहल्यां यमदण्डस्तु शूलं तस्योपरि स्थितम्।
द्वारपालौ स्थितौ चोभौ नियतिर्मृत्युरेव च ।।८९।।
पार्श्वे च रङ्गपीस्य महेन्द्रः स्थितवान्स्वयम्।
स्थापिता मत्तवारण्यां विद्युद्दैत्यनिषूदिनी।।९०।।
स्तम्भेषु मत्तवारण्याः स्थापिताः परिरक्षणे।
भूतयक्षपिशाचाश्च गुह्यकाश्च महाफ्रालाः।।९१।।
जर्जरे तु विनिक्षिप्तं वज्रं दैत्यनिवर्हणम्।
तत्पर्वसु विनिक्षिप्ताः सुरेन्द्रा ह्यमितौजसः।।९२।।
शिरःपार्श्वे ततो ब्रह्मा द्वितीये शङ्करस्तथा।
तृतीये च स्थितो विष्णुश्चतुर्थे स्कन्द एव च ।।९३।।
पञ्चमे च महानागाः शेषवासुकितक्षकाः।
एवं विघ्नविनाशाय स्थापिता जर्जरे सुराः।।९४।।
रङ्गपीस्य मध्ये तु स्वयं ब्रह्मा प्रतिष्ठ्तिः।
इत्यर्थं रङ्गमध्ये तु क्रियते पुष्पमोक्षणम्।।९५।।
पातालवासिनो ये च यक्षगुह्यकपन्नगाः।
अधस्ताद्रङ्गपीस्य रक्षणे ते नियोजिताः।।९६।।
नायकं रक्षतीन्द्रस्तु नायिकां तु सरस्वती।
विदूषकमथोङ्कारःशेषास्तु प्रकृतीर्हरः।।९७।।
यान्येतानि नियुक्तानि दैवतानीह रक्षणे।
एतेषामधिदेवास्तु भविष्यन्तीत्युवाच सः।।९८।।

नानात्वात् नाट्यं पुरुषार्थान् लम्भयति। कविर्नटः प्रेक्षकश्च ईश्वरस्य सृष्टेरनुकीर्तनम् अनुकरणं अनुदर्शनं च कुर्वाणां ईश्वररूपतां प्राप्नुवन्ति।[१३]

---

१३ भवतां देवतानां च शुभाशुभविकल्पकः।
कर्मभावान्वयापेक्षी नाट्यवेदो मया कृतः ।।१०६।।
नैकान्ततोऽत्र भवतां देवानां चापि भावनम्।
त्रैलोक्यस्यास्य सर्वस्य नाट्यं भावानुकीर्तनम् ।।१०७।।
कचिद्धर्मः क्वचित्क्रीडा क्वचिदर्थः क्वचिच्छमः।
क्वचिद्धास्यं क्वचिद्युद्धं क्वचित्कामः क्वचिद्वधः ।।१०८।।
धर्मो धर्मप्रवृत्तानां कामः कामार्थसेविनाम्।
निग्रहो दुर्विनीतानां मत्तानां दमनक्रिया ।।१०९।।
क्लीफ्राानां ष्ट्यजननमुत्साहः शूरमानिनाम्।
अफ्राोधानां विफ्राोधश्च वैदग्ध्यं विदुषामपि ।।११०।।
ईश्वराणां विलासश्च स्थैर्यं दुःखार्दितस्य च।
अर्थोपजीविनामर्थो धृतिरुद्विग्नचेतसाम् ।।१११।।
नानाभावोपसंपन्नं नानावस्थान्तरात्मकम्।
लोकवृत्तानुकरणं नाट्यमेतन्मया कृतम् ।।११२।।
उत्तमाधममध्यानां नराणां कर्मसंश्रयम्।
हितोपदेशजननं धृतिक्रीडासुखादिकृत् ।।११३।।
(एतद्रसेषु भावेषु सर्वकर्मक्रियास्वथ।
सर्वोपदेशजननं नाट्यमेतद् भविष्यति।।)
दुःखार्तानां श्रमार्तानां शोकार्तानां तपस्विनाम्।
विश्रान्तिजननं काले नाट्यमेतन्मया कृतम् ।।११४।।
धर्म्यं यशस्यमायुष्यं हितं बुद्धिविवर्धनम्।
लोकोपदेशजननं नाट्यमेतद् भविष्यति ।।११५।।
न तच्छ्रास्त्रं न तच्छिल्पं न सा विद्या न सा कला।
न स योगो न तत्कर्म यन्नाट्येऽस्मिन्न दृश्यते ।।११६।।

एवमेव ब्राह्ममण्डलविधाने रङ्गदैवतपूजनविधाने च नाट्यमण्डपे विश्वस्मिन्नपि विश्वं प्रतिष्ठितं, सर्वे च देवास्तत्र अधिष्ठिता इति भावनया नाट्यस्य यज्ञरूपता सम्पादिता। ब्राह्ममण्डलविधानं रङ्गदैवतपूजनविधानं च नाट्यशास्त्रतृतीयाध्याये निरूपितम्। तत्र प्रत्येकं देवताया मण्डले निवेश आह्वानं पूजनं च सविस्तरं कीर्तितम्।

नमस्कृत्य महादेवं सर्वलोकोद्भवोद्भवम्
जगत्पितामहं चैव विष्णुमिन्द्रं गुहं तथा ।।४।।
सरस्वतीं च लक्ष्मीं च सिद्धिं मेधां धृतिं मतिम्।
सोमं सूर्यं च मरुतो लोकपालांस्तथाश्विनौ ।।५।।
मित्रमग्निं स्वरान् वर्णान् रुद्रान् कालं कलिं तथा।
मृत्युं च नियतिं चैव कालदण्डं तथैव च ।।६।।
विष्णुप्रहरणं चैव नागराजं च वासुकिम्।
वज्रं विद्युत्समुद्रांश्च गन्धर्वाप्सरसो मुनीन् ।।७।।

(सर्वशास्त्राणि शिल्पानि कर्माणि विविधानि च।
अस्मिन्नाट्ये समेतानि तस्मादेतन्मया कृतम्।।)
तन्नात्र मन्युः कर्तव्यो भवद्भिरमरान् प्रति।
(सप्तद्वीपानुकरणं नाट्यमेतद्भविष्यति।)
येनानुकरणं नाट्यमेतत्तद्यन्मया कृतम् ।।११७।।
देवानामसुराणां च राज्ञामथ कुटुम्बिनाम्।
ब्रह्मर्षीणां च विज्ञेयं नाट्यं वृत्तान्तदर्शकम् ।।११८।।
योऽयं स्वभावो लोकस्य सुखदुःखसमन्वितः ।
सोऽङ्गाद्यभिनयोपेतो नाट्यमित्यभिधीयते ।।११९।।
वेदविद्येतिहासानामाख्यानपरिकल्पनम्।
विनोदकरणं लोके नाट्यमेतद्भविष्यति ।।१२०।।

तथा नाट्यकुमारीश्च महाग्रामण्यमेव च।
यक्षांश्च गुह्यकांश्चैव भूतसंघांस्तथैव च ।।८।।
एतांश्चान्यांश्च देवर्षीन् प्रणम्य रचिताञ्जलिः।
यथास्थानान्तरगतान्समावाह्य ततो वदेत् ।।९।।
भगवद्भिर्निशायां नः कर्तव्यः संपरिग्रहः।
साहाय्यं चैव दातव्यमस्मिन्नाट्ये सहानुगैः ।।१०।।

ब्राह्ममण्डलविधानम् एवं निरूपितम् -

तयोः कक्ष्याविभागेन दैवतानि निवेशयेत् ।।२२।।
पद्मोपविष्टं ब्राह्माणं तस्य मध्ये निवेशयेत्।
आदौ निवेश्यो भगवान् सार्धे भूतगणैर्भवः ।।२३।।
नारायणो महेन्द्रश्च स्कन्दः सूर्योऽग्निनौ शशी।
सरस्वती च लक्ष्मीश्च श्रद्धा मेधा च पूर्वतः ।।२४।।
पूर्वदक्षिणतो वह्निर्निवेश्यः स्वाहया सह।
विश्वेदेवाः सगन्धर्वा रुद्राः सर्वगणास्तथा ।।२५।।
दक्षिणेन निवेश्यास्तु यमो मित्रश्च सानुगः।
पितॄन् पिशाचानुरगान् गुह्यकांश्च निवेशयेत् ।।२६।।
नैऋत्यां राक्षसांश्चैव भूतानि च निवेशयेत्।
पश्चिमायां समुद्रांश्च वरुणं यादसां पतिम् ।।२७।।
वायव्यां वै दिशि तथा सप्तवायून्निवेशयेत् ।
तत्रैव विनिवेश्यस्तु गरुडः पक्षिभिः सह ।।२८।।
उत्तरस्यां दिशि तथा धनदं संनिवेशयेत्।
नाट्यस्य मातृश्च तथा यक्षानथ सगुह्यकान् ।।२९।।

तथैवोत्तरपूर्वायां नन्द्याद्यांश्च गणोरान् ।
ब्रह्मार्षिभूतसङ्घांश्च यथाभागं निवेशयेत् ॥३०॥
स्तम्भे सनत्कुमारं तु दक्षिणे दक्षमेव च ।
ग्रामण्यमुत्तरे स्तम्भे पूजार्थं संनिवेशयेत् ॥३१॥
अनेनैव विधानेन यथास्थानं यथाविधि ।
सुप्रसादानि सर्वाणि दैवतानि निवेशयेत् ॥३२॥
स्थाने स्थाने यथान्यायं विनिवेश्य तु देवताः ।
तासां प्रकुर्वीत ततः पूजनं तु यथार्हतः ॥३३॥
देवताभ्यस्तु दातव्यं सितमाल्यानुलेपनम् ।
गन्धर्ववह्निसूर्येभ्यो रक्तमाल्यानुलेपनम् ॥३४॥
गन्धान् माल्यांश्च धूपं च यथावदनुपूर्वशः।
दत्त्वा ततः प्रकुर्वीत बलिं पूजां यथाविधि ॥३५॥

प्रमाणविचारः

नाट्यशास्त्रे प्रमाणं त्रिविधं प्रोक्तम् - लोको वेदस्तथाध्यात्ममिति।[१४] लोकस्तु भुवने जन इति कोशात् लोकस्यात्र द्विविधोऽर्धः सङ्घटते। स्थावरजङ्गमात्मकं निखिलं भुवनं लोक इत्येकः। तस्मान्न केवलं प्रत्यक्षप्रमाणेन दृश्यमानः अपितु कल्पनापौढो आगमादिगम्योऽपि लोकोऽत्र गृहीतः। तेन त्रैलोक्यस्य सर्वस्य नाट्यं भावानुकीर्तनमिति भरतमुनेर्वचः सङ्गच्छते। ईरेण रचितो यो लोकः शिल्पं वा तस्यैव भावाधिष्ठितस्य

१४ लोको वेदस्तथाध्यात्मं प्रमाणं त्रिविधं स्मृतम् ।
लोकाध्यात्मपदार्थेषु प्रायो नाट्यं व्यवस्थितम् ॥
तदध्यात्माभिसंभूतं छन्दःशफ्रदसमन्वितम् ।
लोकसिद्धं भवेत्सिद्धं नाट्यं लोकात्मकं त्विदम् ॥

अनुकीर्तनं पुनः कथनं प्रातिभोन्मेषेन पुनः सृष्टिर्वा नाट्यम्। सीमितेऽर्थे लोको नाम जनपदवासीजन इति अभिनवगुप्तेन व्याख्यातम्। तस्माज्ञनसमाजो लोक इत्यपरोऽर्थः।

अयं लोकः प्रथमं प्रमाणमिति भवति अस्य सर्वोपरि माहात्म्यम्। नाट्ये यल्लोकसिद्धं तदेव सिद्ध्यति, लोकस्यैव चरितं नानावस्थान्तरात्मकं नाट्यत्वे परिणमति, लोकस्तु अनन्तः, जगतां प्रकृतिरेव अनन्ता, अतः शास्त्रेण लोकव्यावहाराणां लोकवृत्तान्तस्य साकल्येन निर्णयः कर्तुं न शक्यते, प्रयोक्तारः साक्षादेव लोकात् नाट्यव्यवहारमपि अधिगच्छन्त्विति आशयो भरतमुनेः।[१५]

वेद इति तु नाट्यवेदस्तदधिकृत्य कृतं शास्त्रमित्यपि वा। आत्मनि इति अध्यात्मम्। नटः स्वात्मनि स्वान्तःकरणे समाहितः सन् नाट्यानुष्ठानस्य सर्वामितिकर्तव्यतां निश्चिनोति। यथा मनुना वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मन इति धर्मस्य लक्षणमुक्तम्, तथैव नटस्य आत्मनः प्रियमपि

---

१५ **देवतानामृषीणां च राज्ञां लोकस्य चैव हि ।**
पूर्ववृत्तानुचरितं नाट्यमित्यभिधीयते ।।
लोकस्य चरितं यत्तु नानावस्थान्तरात्मकम् ।
तदङ्गाभिनयोपेतं नाट्यमित्यभिधीयते ।।
एवं लोकस्य या वार्ता नानावस्थान्तरात्मिका ।
सा नाट्ये संविधातव्या नाट्यहेतोः प्रयोक्तृभिः ।।१
यानि शास्त्राणि ये धर्मा यानि शिल्पानि याः क्रियाः।
लोकधर्मप्रवृत्तानि नाट्यमित्यभिसंज्ञितम् ।।१
न च शक्यं हि लोकस्य स्थावरस्य चरस्य च ।
शास्त्रेण नियमं कर्तुं नानाचेष्टाविधिं प्रति ।।
नानाशीलाः प्रकृतयः शीले नाट्यं प्रतिष्ठितम् ।
तस्माल्लोकप्रमाणं हि ज्ञेयं नाट्यं प्रयोक्तृभिः ।।
(ना.शा. १३.१२२-२९)

अत्र प्रमाणत्वेनोरीकृतं मुनिना। अध्यात्मप्रमाणनिष्पत्तये नाट्यशास्त्रे मुनिः बहुत्र वैकल्पिक्यो व्यवस्थाः निर्दिशति। यत्र कापि व्यवस्था न स्यात् तत्र स्वमन्वेष्टव्यमित्यपि स नैकत्र व्यवस्थां विदधाति। विशिष्य सात्त्विकेऽभिनये सत्त्वं नाम मनःप्रभवः समाधिः, तत्र स्वात्मविश्रान्तिं प्राप्य नटः निखिल नाट्य. संसारमात्मानं चाभिनयन्तमपि पश्यति। स यथा जीवः स्वदेहः परित्यज्य देहान्तरमुपाश्रितः परभावं प्रकुरुते तथैव परभावानभिनयति।[१६]

सर्वशास्त्रार्थसंपन्नं सर्वशिल्पप्रवर्तकम्। ९५
त्रैलोक्यस्यास्य सर्वस्य नाट्यं भावानुकीर्तनम्। २.१०७
भविष्यतश्च लोकस्य सर्वकर्मानुदर्शकम्। - १४

अनेन प्रमाणत्रितेन नाट्ये लोकशास्त्रयोः सम्बन्धः लोकपरम्पराणां सङ्क्रान्ति, आत्मानुभूतिः समाधिश्च तेन नटस्यापि कृते परमपुरुषार्थस्य मोक्षस्य लाभः इति अभिनवगुप्तस्य मतं सुससङ्गतमेव।

लोकप्रमाणनिष्पत्तयः

लोकप्रमाणत्वात् नाट्यशास्त्रं लोकशास्त्रयोः तारतम्यं पोष्यपोषकभावं वा विचारयति। यन्न शास्त्रे प्राप्येत, तद् लोकाद् गृह्णीयादिति मुनेरुपदेशात्, लोकश्चोपदेश्यः संस्कार्य इत्यपि च विधानात् शास्त्रे लोकस्य सङ्कान्तिः लोके च शास्त्रस्य प्रभाव इति उभयथा व्यवस्था जाघटीति। तां च व्यवस्थां नाट्यशास्त्रपरम्परायाम् एतासु कोटिषु विशिष्य विलोकयामः।[१७]

---

१६ **यथा जीवः स्वभावं स्वं परित्यज्यान्यदैहिकम् ।।**
परभावं प्रकुरुते परदेहं समाश्रितः।
एवं बुधः परं भावं सोऽस्मीति मनसा स्मरन् ।।
वेषवागङ्गलीलाभिश्चेष्टाभिश्च समाचरेत् । ना.शा. २६.१७,१८

१७ **विवरणार्थं मम Aspects of Natya Shastra, KAIR, Aluva २०११ इति पुस्तकं द्रष्टव्यम् ।**

मार्गो देशी च

प्रयोगस्य द्वैविध्यम्

सिद्धिः

भूमिका

लीला

नाट्यायितम्

रूपकाणामवान्तरभेदाः

मार्गो देशी च – भरतमुनेः परम्परायामेव देशीनाट्यस्य, देशीकरणानां, देशजाङ्गहाराणां च विवेचनं बहुभिराचार्यैः कृतम्। मार्गश्च देशी चेति अनयोः अन्तःसम्बन्धस्य परम्परा या परस्तात् विशदं विवेचिता सङ्गीतशास्त्रे नृत्तशास्त्रे तस्या प्रवर्तनं भरतमुनेर्नाट्यशास्त्रदेव समजनि। देशा अत्र विविधानि जनपदानि, तत् तद्देशेषु व्यवहार्यं सङ्गीतं, नृत्तं नाट्यं अन्याश्च कला देशीति पदेन गृहीताः, तत्र देशज भाषा अपि उपादीयन्ते।[१८]

प्रयोगस्य द्वैविध्यम् – प्रयोगस्य द्वैविध्ये मुनिना प्रत्यपादि - बाह्याभ्यन्तरभेदाभ्याम्। बाह्यं तु शास्त्रबाह्यम्, स्वयं शास्त्रकारः शास्त्रबाह्यस्य प्रयोगमनुमन्यते। बाह्यप्रयोगेषु लोकनाट्यानि विश्रान्तानि, तेषु शास्त्रव्यवस्था

---

१८ **तत् तद्देशेषु सङ्गतं तत् तद्भाषाभिरन्वितम्।**
देशीति देशिकमपि कथयन्ति मनीषिणः।। (भावप्रकाशः, अ. १०, पृ. ३९०)

देशे देशे च यत् ,सिद्धं नृपाणामपि मन्दिरे।
गीतं वाद्यं च नृत्यं च देशीति प्रोच्यते फ्रुधैः।। (सङ्गीतसारोद्धारः १.८)

देशे देशे जनानां यथेच्छा हृदयरञ्जनम्।
गानं च वादनं नृत्यं तद् देश्यमभिधीयते।
देश्यंचार्वङ्गहाराद्यैश्चामरैरुपशोभितम्।। (नाट्यसर्वस्वदीपिका २.२.२६)

न सायासं स्वीक्रियते। यैः आचार्यान्नाट्यशास्त्रं नाधीतं, स्वविवेकेन नाट्यं ये प्रयुञ्जते, ते लोकसम्मतं बाह्यं प्रयोगं विदधति।[१९]

सिद्धिः – सिद्धिर्द्विविधा प्रोक्ता देवी च मानुषी च। मानुष्यां सिद्धौ न पूर्णतया तन्मयीभावो भवति। तेन प्रेक्षकः नटान् अभिनयतः पश्यति, तेषामभिनयविशेषान् निरूपयति, निन्दति, श्लाघते वा। नटा अपि अभिनयं कुर्वाणाः क्वचित् नाट्यसंसारात् पृथक् स्थिताः नटत्वेन प्रेक्षकान् सम्बोधयन्ति। लोकनाट्येष्वपि इयमेव व्यवस्था।[२०]

भूमिका - भूमिकाविकल्पनाम्नि अध्याये अनुरूपा, विरूपा रूपानुसारिणी चेति त्रिविधा भूमिका निरूपिताः। वयोऽनुरूपं स्त्री स्त्रियाः

---

१९ अथ बाह्यप्रयोगेषु प्रेक्षागृहविवर्जिते ।
विदिक्ष्वपि भवेद्रङ्गः कदाचिद्भर्तुराज्ञया ।। .....
एतदेव विपर्यस्तं स्वच्छन्दगतिचेष्टितम् ।
अनिबद्धगीतवाद्यं नाटयं बाह्यमिति स्मृतम्।
लक्षणाभ्यन्तरत्वाद्धि तदावाभ्यन्तरमिष्यते।
शास्त्रबाह्यं भवेद्यस्तु तद्बाह्यमिति भण्यते।। (२२.७७-७८,८०)
अनाचार्योदिता ये च ये च शास्त्रबहिष्कृताः ।
फ्राह्यं प्रयुञ्जते ते अज्ञात्वाचार्यकीं क्रियाम्।।

२० सिद्धिस्तु द्विविधा ज्ञेया मानुषी दैविका तथा।
वाङ्मनःकायसम्भूता नानाभावरसाश्रया ।।
दशाङ्गा मानुषी सिद्धिर्दैवी तु द्विविधा स्मृता।
नानासत्त्वाश्रयकृता शारीरी वाङ्मयी तथा ।।
स्मितार्धहासा विज्ञेया साध्वहो कष्टमेव च ।
प्रवृद्धनादावक्रुष्टा सिद्धिर्ज्ञेया च वाङ्मयी ।।
पुलकैश्च सरोमाञ्चैरभ्युत्थानैस्तथैव च ।
चैलादानाङ्गुलिविक्षेपैः शारीरी सिद्धिरिष्यते।।
किंचिच्छ्लिष्टो रसो हास्यो नृत्यद्भिर्यः प्रयुज्यते।
स्मितेन सम्प्रतिग्राह्यं प्रेक्षकैर्नित्यमेव च ।।

पुरुषः पुरुषस्य च भूमिकां निर्वहतीत्यनुरूपा, तद्विपरीता च विरूपा। लोकनाट्येषु क्वचित् पुरुषा स्त्रीणां स्त्रियः पुरुषाणां भूमिकाः कुर्वन्ति।[२१]

किंचिदस्पष्टहास्यं यत्तथा वचन एव च ।
अर्धहास्येन तद्ग्राह्यं प्रेक्षकैर्नित्यमेव हि ।।
विदूषकोच्छेदकृतं भवेच्छिल्पकृतं च यत् ।
अतिहास्येन तद्ग्राह्यं प्रेक्षकैर्नित्यमेव हि ।।
यद्वर्गपदसंयुक्तं तथातिशयसंभवम् ।
तत्र साध्विति सद्वाक्यं प्रयोक्तव्यं हि साधकैः।।
अहोकारस्तदा कार्यो नृणां प्रकृतिसंभवः।
विस्मयादिषु भावेषु प्रहर्षार्थे तथैव च ।।
करुणेषु प्रयोक्तव्यं कष्टं शास्त्रकृतेन तु ।
प्रवृद्धनादः कर्तव्यो विस्मयोत्थो हि सर्वदा ।।
साधिक्षेपेषु वाक्येषु प्रस्पन्दिततनूरुहैः।
कुतूहलोत्तरावेधैर्बाहुमानेन साध्यते ।।
दीप्तप्रदेशं यत्कार्यं छेद्यभेद्याहवात्मकम्।
सविद्रवमथोत्फुल्लं तथा युद्धनियुद्धकम्।।
प्रकम्पितात्समरसं साश्रमोत्थानमेव च ।
तत्प्रेक्षकैस्तु कुशलैः साध्यमेवं विधानतः ।। २७.२-१४

२१ अनुरूपा बृहद्रूपा अविरूपानुरूपिणी ।
त्रिप्रकारा भवेन्नाट्ये प्रकृतिस्तु विभूषिता ।।१।।
स्त्रियास्तु स्त्रीकृतो भावः पौरुषः पुरुषस्य च ।
यथा वयस्तथा तस्मिन्ननुरूपा तु सा भवेत् ।।२।।
यो फ्राालः स्थाविरीं भूमिं वृद्धो वा बालभूमिकाम्।
तद्भावैः कुरुते नाट्ये विरूपेति पुनः।
रूपानुरूपा सा ज्ञेया प्रयोगे प्रकृतिस्तथा ।।४।।
छन्दतः पौरुषीं कुर्याद् भूमिकां स्त्रीप्रयोगतः।
न परस्परचेष्टाभिः कुर्यातां वृद्धबालिशौ ।।५।। २५.१-५

नाट्यायितम् – अभिनयविवेचने सामान्याभिनयप्रसङ्गे शारीराभिनयस्य षड् भेदा उक्ताः। एतेषु नाट्यायितं नाम भेदोऽपि कीर्तितः। कालप्रकर्षहेतोः यावत् पात्रं प्रविशति, तावन्नाट्यायितं विधीयते। पात्रप्रवेशसूचनार्थं तत्र नाट्यं स्वतः स्फुरितं नटाः कर्तुं शक्नुवन्ति। पात्रं आत्मानमधिकृत्य कुतपस्थितैः गायकैर्गायिकाभिर्वा गीयमानां गीतिमाश्रित्य नटत्वेन अभिनयं करोति, एतदपि नाट्यायितम्।[२२]

लीला - सामान्याभिनये एव स्वभावजा अलङ्काराः पठिताः। लीला तत्र प्रथमोअलङ्कारः। वाचिकसात्त्विकार्याभिनयैः स्वप्रियजनस्यानुकृतिः लीला भवति।[२३]

अभिनवगुप्त-शारदातनय-सागरनन्दि-प्रभृतिभिराचार्यैः लीलातत्त्वस्य विवेचनममुष्यामेव परम्परायां विशदं विहितम्। अयं लीलाख्योऽलङ्कारः लीलानाट्यपरम्परायाः पूर्वरूपम्। लीलानाट्येषु रासलीलारामलीलादिषु इष्टस्य अनुकृतिर्विधीयते, गोप्यः कृष्णीनुकृतिः कुर्वन्ति।

रूपकाणामवान्तरभेदाः - नाट्यशास्त्रे दशरूपकाणि निरूपितानि। दशरूपकातिरिक्तानि भवन्ति नाना अवान्तररूपाणि। तानि नाट्यशास्त्रपरम्परायां गेयरूपकाणि, नृत्तप्रबन्धाः उपरूपकाणिति वा

---

२२ **नाट्यायितमुपचारैर्यः क्रियतेऽभिनयसूचया नाट्ये।**
कालप्रकर्षहेतोः प्रवेशकैः सङ्गमो यावत्।।
स्थाने ध्रुवास्वभिनय यः क्रियते हर्षशोकरोषाद्यैः।
भावरससम्प्रयुक्तैर्ज्ञेयं नाट्यायितं तदपि ।। १२.४८, ४९

२३ **वागङ्गालङ्कारैः शिष्टैः प्रीतिप्रयोजितैर्मधुरैः।**
इष्टजनस्यानुकृतिर्लीला ज्ञेया प्रयोगज्ञैः।। २२.१४
गात्रारम्भानुभावाश्च लीलाद्या दश योषिताम्।।
बुद्ध्यारम्भानुभावाश्च रीतिवृत्तिप्रवृत्तयः।। १. ६

व्यपदिष्टानि। उपरूपकाणां रूपकैः सम्बन्धो दृढीयान् वर्तते। उपरूपकाणि तावत् लोकनाट्यपरम्परायां सम्पृक्तानि। तद्यथा-

उत्तरप्रदेशे - स्वांग, रास, नौटंकी, सांगीत, रामलीला (लीलानाट्यम्, लीलातत्त्वम्), रासलीला इत्यादीनि

मध्यप्रदेशे	-	नाचा, स्वाङ्ग इत्यादीनि
काश्मीरेषप	-	भाण्डपथेर इत्यादीनि
असमे	-	अङ्कियानाट्यम्, भावना, लाइहरोओबा इत्यादीनि
उत्कलप्रदेशेषप	-	कंसवधः, पालानाट्यम् इत्यादीनि
आन्ध्रेषु, कर्णाटकेषु	-	यक्षगानम्, हरिकथा इत्यादीनि
गुर्जरप्रदेशेषु	-	भवइनाट्यम् इत्यादीनि
केरलेषु	-	कूडियाट्टम्, रामाट्टम्, कृष्णाट्टम्, थेरुकुत्तु, कथकलिः इत्यादीनि
तमिलनाडुषु	-	वीथीनाटकम्, भागगवतमेला इत्यादीनि

लोकनाट्यानि उपरूपकाणामेव भेदाः।

नाट्यशास्त्रस्य अन्तिमेऽध्याये नाट्यस्य भूलोकावतरणकथा निरूपिता। तत्र शिल्पकस्य नाट्यविशेषस्य चर्चा प्राप्यते। इदं शिल्पकं नाम नाट्यविशेषः परवर्तिभिराचार्यैरुपरूपकेषु निरूपितः। भरतमुनिना स्वशिष्याः खलु उपरूपकाणि पाठिताः, ते तु स्वविवेकन लोकपरम्परामश्रित्य वा शिल्पकं प्रयोक्तुं व्यवसिताः। इदं शिल्पकं ग्राम्यधर्मकम्, ऋषीणां व्यङ्ग्यकरणं ग्राम्यधर्मप्रवर्तितमभवत्। आङ्ग्ल-भाषायां सैटायर (satire) इति यत् कथ्यते तस्य प्रयोगस्तैः भरतशिष्यैरस्मिन् शिल्पकाभिनये विहितः। विकृतानुकरणादिदं विडम्बनमित्यपि प्रोक्तम्। ऋषय एतादृशं प्रयोगं दृष्ट्वा

कोपाविष्टाः भरतशिष्येभ्यः शापं विसृष्टवन्तः।[२४]

भरतेन तु शिल्पकादि ग्राम्यधर्मप्रवृत्तानां रूपकाणां निषेधो न विहितः, ऊत्तरतन्त्रे कोहलो यन्मयो नोक्तं तद्विवेचयिष्यतीति तस्योक्तैः परवर्तिभिराचार्यैः बहूनि उपरूपकाणि विवेचितानि। तानीत्थं सन्ति -

उल्लोप्यकम् (उल्लाप्यकम्)	कल्पवल्ली
कर्णम् (कर्णा)	काव्यम् (अलङ्कारशास्त्रोक्तकाव्याद् भिन्नम्)
गोष्ठी	चर्चरी
छलित (छलितक, छालिक्य)	चित्रकाव्यम् (रागकाव्यम्)
जक्कडी	डोम्बी
तोटकम् (त्रोटकम् वा)	दण्डरासकम्
दुर्मल्लिका (दुर्मीलिता)	द्विपदी
नर्तनकम्	नाटिका

---

२४ कस्यचित् त्वथ कालस्य शिल्पकं ग्राम्यधर्मकम्।
ऋषीणां व्यङ्ग्यकरणं कुर्वद्भिर्गणसंश्रयम्।।
अश्राव्यं तद् दुराचारं ग्राम्यधर्मप्रवर्तितम्।
निष्ठुरं चाप्रस्तुतं च काव्यं संसदि योजितम्।।
तच्छ्रुत्वा मुनयः सर्वे भीमरोषप्रकम्पिताः।
ऊचुस्तान् भरतान् क्रुद्धा निर्दहन्त इवाग्नयः।
मा तावद् भो द्विजा युक्तमिदमस्मद्विडम्बनम्।
को नामायं परिभवः किञ्च नास्मासु सम्मतम्।। ...
ऋषीणां ब्राह्मणानां च समवायसमागमे ।
निर्ब्रह्मणो निराभू (हू ?)तः शूद्राचारो भविष्यति ।।
यश्च वा भवतां वंशः स चाशौचो भविश्यति।
ये च वो वंशजास्तेऽपि भविष्यन्त्यथ नर्तका।
परोपस्थानवन्तश्च पुंस्त्रीबालोपजीविनः।
शापं दत्तं तथा ज्ञात्वा सुतेभ्यो मे तदा सुराः। (, ३६.३३-३६)

नाट्यरासकम्
पारिजातकम्
पिण्डी
प्रकरणी
प्रस्थानम्
प्रेक्षणकम् (प्रेङ्खणम् वा)
प्रेरणी (पेरणी वा)
भाणः (दशरूपकान्तर्वर्तिनः भाणाद् भिन्नम्)
भाणिका
भाणी
भेद्यकम्
मणिकुल्या
मल्लिका
रामाक्रीडः
रासकम्
लासकम्
लासिका
विलासिका (लासिका)
शम्या
शिल्पकम्
शृङ्खला
श्रीगदितम्
षिद्गकम्
सट्टकम्
सल्लापकः (संल्लापकः)
स्कन्धकम्
हल्लीसकम्

एतेषाम् उपरूकाणं सम्बन्धो वोकपरम्पराभिः लोकनाट्यैश्च वर्तते।

नाट्यशास्त्रस्य वैकिं स्वरूपम्

अतिप्राचीनकालादेव भरतमुनेरयं ग्रन्थं न केवलं भारते अपितु भारतेतरदेशेष्वपि प्रचारमाप। श्याम(Thailand)देशे प्राचीनदेवमन्दिरेषु नाट्यशास्त्र-सम्मतानि करणानि उत्कीर्णानि। काम्बोजदेशे मलैशियादेशे जापानदेशस्य नाट्यपरम्परायां च नाट्यशास्त्रं क्वचित् प्रत्यक्षं क्वचिच्च परोक्षं प्रतिफलति।

इत्थं नाट्यशास्त्रं नाम भारतीयसंस्कृतेर्निरवधिः शेवधिः, सर्वथा तद्रक्षणाय प्रयत्नो विधेय इति दिक्।

***

प्रसाराङ्गस्य प्रकाशनानि

संस्थापनाविशेषोपन्यासग्रन्थः - १

भारतीयमनश्शास्त्रस्य मूलतत्त्वानि (मूल्यम् - रू १०/-)

लेखकः - **डा.बन्नञ्जे गोविन्दाचार्यः**

संस्थापनाविशेषोपन्यासग्रन्थः - २

नाट्यशास्त्रगौरवम् (मूल्यम् - रू १०/-)

लेखकः - आचार्यः **राधावल्लभ त्रिपाठी**

कर्नाटकसंस्कृताध्ययनम् (मूल्यम् - रू १५०/-)


विश्वविद्यालयस्य षाण्मासिकं शोधपत्रम्

एतेषां प्राप्तिस्थानम् : **प्रसाराङ्गम्, कर्नाटकसंस्कृतविश्वविद्यालयः**

पम्पमहाकविमार्गः, चामराजपेटे, बेङ्गलूरु - ५६००१८

दूरवाणी - २६७०१३०३, ई-सङ्केतः karnataksanskrituniversity@gmail.com

---



आचार्य भर्तृहरिप्रणीतं

वाक्यपदीयम्

ब्रह्मकाण्ड-कालसमुद्देश-क्रियासमुद्देशानुवादसहितः

कन्नडानुवादः - प्रो. एन्. र

प्रकाशनम्: प्रसाराङ्गम्, कर्नाटकसंस्कृ

चामराजपेटे, बेङ्गलूरु-५६

पृष्ठानिः ३२८ मूल्यम् : रू.

अस्य प्राप्तिस्थानम् :

सप्न बुक् हौस्, गान्धिनगरम्, बेङ्गलूरु – 560009

दूरभाषा : 080–22269648

कुलपतिभणितिः

जानन्त्येव हि तत्रभवन्तो भवन्तः यत् कर्नाटकसंस्कृतविश्वविद्यालयस्य प्रधानतमम् उद्देश्यद्वयं – वेदवेदान्तादिशास्त्रेषु उन्नताध्ययनव्यवस्थापानं, शोधकार्यञ्चेति । विशिष्य एतद्द्वारा शास्त्रवाङ्मयस्य तत्त्वं समाजे व्यापयितुं विशेषोपन्यास-ग्रन्थप्रकाशनादियोजनाभिः प्रयासः विहितः । तत्र संस्थापनाविशेषोपन्यासमालिकायाम् अकृतप्रवेशेषु नातिप्रथितेषु शास्त्रमार्गेषु अन्तःक्षेत्रीयविषयेषु कृतभूरिपरिश्रमैः विख्यातनामधेयैः विद्वद्वरेण्यैः विशिष्टव्याख्यानानि समायोज्य तदीयवाङ्मयं ग्रन्थरूपेण प्रकाशनीयमति अस्माकं सङ्कल्पः ।

महदिदं प्रमोदस्थानं यद् भारतस्य प्रतिष्ठां दिगन्तेषु विस्तारयन्तः विद्वदग्रगण्याः प्राच्यप्रतीच्यशास्त्रमर्मज्ञाः राष्ट्रियसंस्कृतसंस्थानस्य कुलपतयः आचार्याः राधावल्लभ-त्रिपाठिवर्याः स्वीयोपन्यासेन व्याख्यानमालामिमां विभूषयन्ति । भरतस्य नाट्यशास्त्रमारभ्य प्रवृत्ताम् आधुनिकशास्त्रपरम्पराम् अधिकृत्य रचितोऽयं नाट्यशास्त्रगौरवम् इति प्रौढः प्रबन्धः व्याख्यानमालायाः गौरवं वर्धयति इत्यत्र नास्ति सन्देहः । तमेतं निबन्धं विदुषां पुरस्तात् उपस्थापयितुं मोमुदीति नः चेतः ।

भवदीयः विद्वद्वशंवदः

प्रो. मल्लेपुरं जि. वेङ्कटेशः

प्रसाराङ्गम्, कर्नाटकसंस्कृतविश्वविद्यालयः